योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ००४

चतुर्थः सर्गः ४

श्रीवसिष्ठ उवाच ।

साहंतादिजगच्छान्तौ बोधे संवित्कलात्मनि ।

संशान्तदीपसंकाशस्त्यागः सिद्ध्यति नान्यथा ।। १

न त्यागः कर्मसंत्यागो बोधस्त्याग इति स्मृतः ।

अजगत्प्रतिभैकात्मा योऽनहंतादिरव्ययः ।। २

अयं सोहमिदं तन्म इति निःस्नेहदीपवत् ।

शान्ते परमनिर्वाणे प्रबोधात्मेति शिष्यते ।। ३

अयं सोहमिदं तन्मे शान्तमित्येव यस्य नो ।

न ज्ञानं तस्य नो शान्तिर्न त्यागो न च निर्वृतिः ।। ४

ममेदमयमेवाहमित्येतावति यः क्षयः ।

बोधात्मा शिवमाशान्तं तस्मादन्यन्न विद्यते ।। ५

अहमंशे विदा क्षीणे सर्वमेव क्षयं गतम् ।

न किंचिच्च क्वचित्क्षीणं निर्वाणैकघनं स्थितम् ।। ६

अहविदनहंवित्त्वादेव शाम्यत्यविघ्नतः ।

एतावन्मात्रसाध्येयं किमिवेयं कदर्थना ।। ७

अहंनाहमिति भ्रान्तिर्न च चित्त्वादृतेऽस्ति सा ।

चित्त्वं चाकाशविशदमतः क्वैषा भ्रमस्थितिः ।। ८

न भ्रमो भ्रमणं नैव न भ्रान्तिर्भ्रामकोऽस्ति वा ।

अनालोकनमेवेदमालोकान्नेदमस्ति ते ।। ९

विद्धि चिन्मात्रमेवेदमसद्रूपोपमं ततम् ।

तेनालं मौनमास्स्वैवं सर्वं निर्वाणमात्रकम् ।। १०

येनैवाशु निमेषेण त्वहमित्येव चेतति ।

तेनैव नाहमित्येव चेतित्वाशु न शोच्यते ।। ११

अहंभावं नभोर्थेन निर्वाच्यारूढबाणवत् ।

अजस्रमाशु वाऽक्षीणं तिष्ठावष्टब्धतत्पदः ।। १२

सनभोर्थामहन्तां त्वं चेतन्नेवमनारतम् ।

सर्वभावैरनारूढो भव तीर्णभवार्णवः ।। १३

स्वभावमात्रविजये स्वयं यस्य न वीरता ।

तस्योत्तमपदप्राप्तौ पशोर्ब्रूहि कथैव का ।। १४

षड्वर्गो निर्जितः पूर्वं येनोत्तमविदा स्वतः ।

भाजनं स महार्थानां नेतरो नरगर्दभः ।। १५

यस्य स्वान्तर्मनोवृत्तिर्जीयमाना जिताथवा ।

विषयः स विवेकानां स पुमानिति कथ्यते ।। १६

अर्थो दृषदिवाम्भोधौ यो य आपतति त्वयि ।

तस्मादेव पलायस्व नाहमित्येव भावयन् ।। १७

नाहमस्मीति बुद्ध्वापि सोपपत्तिकमप्यलम् ।

जानानो ज्ञप्तिमात्रं च किमज्ञ इव मुह्यसि ।। १८

न ज्ञेयमर्थतोऽस्तीह हेम्नीव कटकादिता ।

भ्रान्तिमात्रादृते सा च शाम्यत्यस्मरणेन ते ।। १९

यो यो भाव उदेत्यन्तस्त्वयि स्पन्द इवानिले ।

नाहमस्मीति चिद्वृत्त्या तमनाधारतां नय ।। २०

लोभो लज्जा मदो मोहो येनादाविति नो जिताः ।

निरर्थकमनर्थेऽस्मिन्स किमर्थं प्रवर्तते ।। २१

अहन्त्वं पवने स्पन्द इव यत्त्वयि संस्थितम् ।

परमात्मनि तन्नान्यदेतत्स्पन्द इवानिले ।। २२

असर्गसंविदा सर्गः परेऽस्तोऽतिविराजते ।

संनिवेशविशेषेण दुरर्थोऽपि हि शोभते ।। २३

परमात्मा तु नोदेति नास्तं याति कदाचन ।

न चास्मादन्यदस्तीति को भावोऽभाव एव वा ।। २४

परं परे पूर्णं पूर्णे शान्तं शान्ते शिवं शिवे ।

इत्येवमात्रं विततं नाहं न च जगन्न धीः ।। २५

अनिर्वाणे विनिर्वाणं शान्तं शान्ते शिवे शिवम् ।

निर्वाणमप्यनिर्वाणं सनभोर्थं न वापि तत् ।। २६

शस्त्राघाताः प्रसह्यन्ते सह्यन्ते व्याधिवेदनाः ।

नाहमित्येवमात्रस्य सहने का कदर्थना ।। २७

जगत्पदार्थसार्थानामहमित्यक्षयोऽङ्कुरः ।

तस्मिन्निर्मूलतां याते जगन्निर्मूलतां गतम् ।। २८

बाष्पेणेवाहमर्थेन निःसारेणापि सारवत् ।

व्यामलः परमादर्शस्तच्छान्तौ संप्रसीदति ।। २९

अहमर्थः परे वायौ स्पन्दस्तत्प्रशमे तु तत् ।

अनिर्देश्यमनाभासमनन्तमजमव्ययम् ।। ३०

अहमर्थः पुरो द्रव्यप्रतिबिम्बप्रदश्चिति ।

तच्छान्तौ सा निराभासमनन्तमजमव्ययम् ।। ३१

अहमर्थाम्बुदे क्षीणे परमार्थशरन्नभः ।

परयानन्तया लक्ष्म्या स्वच्छयाच्छं विराजते ।। ३२

अहमर्थमलोन्मुक्तमव्यक्तं ताम्रमङ्ग चेत् ।

तत्परं परमाभासं संपन्नं हेम कान्तिमत् ।। ३३

यथा निरभिधार्थश्रीर्भजत्यव्यपदेश्यताम् ।

तथानहन्ताहन्तेयं ब्रह्मत्वमधिगच्छति ।। ३४

अस्त्यहन्त्वे स्थितं ब्रह्म सनामेव पदार्थवत् ।

शान्तवत्सदिवाभासं तद्वत्स व्यपदेशवान् ।। ३५ ।

अहमर्थो जगद्बीजं यदि दग्धमभावनात् ।

तदहन्त्वं जगद्बन्ध इत्यादेः कलनैव का ।। ३६

सद्ब्रह्म शिवमात्मेति परे नामकलङ्किता ।

उदेत्यहन्ता कुम्भत्वादिव मृद्धातुविस्मृतिः ।। ३७

अहमर्थादियं बीजात्सत्ता बिम्बलतोत्थिता ।

यस्यां जगन्त्यनन्तानि फलान्यायान्ति यान्तिच ।। ३८

साद्र्यब्ध्युर्वीनदी सेयं रूपालोकैषणादिका ।

अहमर्थस्य मरिचबीजस्यान्तश्चमत्कृतिः ।। ३९

द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।

इत्यामोदोऽहमर्थोग्रकुसुमस्य विकासिनः ।। ४०

अहमर्थः प्रविसृतः प्रकटीकुरुते जगत् ।

सद्रूपालोकमननं प्रवृत्त इव वासरः ।। ४१

प्रवृत्तेन दिनेनार्थः प्रकटीक्रियते यथा ।

असज्जगदहन्त्वेन क्षणान्निर्मीयते तथा ।। ४२

अहमित्यर्थदुस्तैललवो ब्रह्मणि वारिणि ।

प्रसृतो यत्तदाश्वेतत्त्रिजगच्चक्रकं स्थितम् ।। ४३

उन्मेषमात्रेणाहन्ता जगन्त्यनुभवत्यहो ।

न निमेषेण दृगिव सत्यानीत्यप्यसन्त्यलम् ।। ४४

अहमर्थे प्रविसृते संसारो ह्यनुभूयते ।

नान्तर्भूय परिक्षीणे लोचनस्येव तारके ।। ४५

अहमंशे निरंशत्वं नीते शाश्वतसंविदा ।

शाम्यतीयमशेषेण संसारमृगतृष्णिका ।। ४६

स्वसंविद्भावनामात्रसाध्येऽस्मिन्वरवस्तुनि ।

सिद्धमात्रात्मनि स्वैरं मा खेदं गच्छमा भ्रमीम् ।। ४७

स्वयत्नमात्रसंसाध्यादसहायादिसाधनात् ।

अनहंवेदनान्नान्यच्छ्रेयः पश्यामि तेऽनघ ।। ४८

विस्मृत्याहं त्वमास्स्व प्रविसृतविभवः

पूरिताशेषविश्वो

विष्वक्शैलान्तरिक्षक्षितिजलधिमरु-

न्मार्गरूपोऽमलात्मा ।

स्वस्थः शान्तो विशोकः करणमलकला-

वर्जितो निष्प्रपञ्चो

निःसंचारश्चरात्मा सकलमसकलं

चेति सिद्धान्तसारः ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे अहंतानिरासो नाम चतुर्थः सर्गः ।। ४ ।।